SUṢAMĀ : Multidisciplinary Research Journal ISSN: 3107-4529
(International Peer-Reviewed & Refereed Journal)
Vol. 1, Issue-4, (Oct-Dec) 2025

# शिशुपालवधमहाकाव्यस्य प्रथमसर्गे रीति-प्रयोगचारुत्वम्

**Dr. Bholanath Mondal**
Dakshin Tangarberiya, Chhayani, Baruipur,
South 24 Parganas, West Bengal, India
Email: bholanathmondal@gmail.com

**Abstract:** संस्कृतसाहित्ये महाकविना माघेन विरचितं विंशतिसर्गात्मकं *शिशुपालवधम्* एकं बहुप्रशंसितं तथा सर्वजनविदितं महाकाव्यम्। समग्रे काव्येऽस्मिन् कवेः रीतिप्रयोगे चातुर्यं लक्ष्यते। अत्र महाकाव्ये वैदर्भी, गौडी, पाञ्चाली चेति तिस्रः रीतयः महाकविना सन्निवेशिताः। एतासां रीतीनां प्रयोगेन पद्यप्रचयाः महच्चारुत्वम् आप्तवन्तः। अस्मिन् लघुशोधपत्रे *शिशुपालवधस्य* प्रथमसर्गं पुरस्कृत्य रीतिप्रयोगे माघस्य कीदृशं चातुर्यमस्ति, तथा रीतियुक्तानि सन्ति कथं पद्यानि चारुत्वपरकाष्ठां गतानि तदस्माभिः यथामति यथायुक्ति च समुपस्थापयितुं प्रचेष्ट्यते।

**Keywords:** रीतिः, महाकाव्यम्, मार्गः, पदविन्यासः, पदसंघटना।

### क) भूमिका—

संस्कृतसाहित्यजगति ज्योतिष्कायमाणेषु कविमुख्येषु कालिदासादनन्तरं महाकवेः माघस्य स्थानमिति संस्कृतसाहित्यरसपरिशीलनतत्परैः विदग्धनिवहैः अभ्युपगतम्। खीष्टीयसप्तमशताब्द्या अन्तिमभागे सम्भा-वितस्य महाकवेरस्य महाभारतीयेतिवृत्ताश्रयि विंशतिसर्गान्वितं *शिशुपालवधा*भिधेयं महाकाव्यं सर्वेषां रसिक-चित्तम् आनन्दधारया संप्लावयत् विराजते। रसोपस्थापनचारुत्वेन, अभिनवकल्पनागौरवेन, अनुप्रासोपमा-द्यलङ्कारसौकर्येण, शब्दचयनवैचित्र्येण महाकाव्यमिदं चिराय अस्माकं चेतः समाकर्षतीति। इमां कृतिमवलम्ब्य लघुशोधपत्रविरोचने अस्माकं मतिः समुदिता। कृतेरस्या विषयान्तराण्युपजीव्य विरचिताः केचन निबन्धा अस्मन्नयनयोरापतिताः। परन्तु तत्र प्रयुक्तानां रीतीनां सामग्रिकसमीक्षाविधौ न कापि प्रचेष्टा अस्मदीयां ज्ञानगोचरतां गता। अतः तथाविधे प्रयासे धृतव्रता अपि वयं साम्प्रतं काव्यस्यास्य प्रथमसर्गे प्रयुक्तानां रीतीनां पर्यालोचनं यथामति करिष्यामहे।

### ख) रीति-शब्दस्य व्युत्पत्तिः—

रीतेः व्युत्पत्तिलभ्योऽर्थ आदौ विवेचनीय एवेति विभाव्य टीकाकृताम् आलङ्कारिकाणां च मतमात्रम् उपस्थाप्यते। 'रीयते ज्ञायते गुणविशेषोऽनया इति रीतिः। गत्यर्थक–री-धातोः करणे क्तिः।'[1] 'रीणन्ति गच्छन्त्यासां गुण इति, रीयते क्षरन्त्यास्यां वाङ्मधुधारेति वा रीतिः, अधिकरणार्थे क्तिन् प्रत्ययः।'[2]

### ग) रीतेः स्वरूपविमर्शः श्रेणीविभागश्च—

संस्कृतालङ्कारशास्त्रेतिहासे वामनाचार्य एव प्रथमो येन रीतिशब्दस्य व्यवहारः कृतः।[3] तन्मते गुणविशिष्टा पदरचना रीतिः। तथा चोक्तं तेन– 'विशिष्टा पदरचना रीतिः। विशेषो गुणात्मा' इति।[4] सा च रीतिः त्रिप्रकाराः– वैदर्भी, गौडीया, पाञ्चाली चेति। तस्य मते विदर्भ-गौड-पाञ्चालेषु तत्रस्थैः कविभिः यथास्वरूपम् उपलब्धत्वात् वैदर्भ्यादिसमाख्या– 'विदर्भादिषु दृष्टत्वात् तत्समाख्या'[5] इति। तस्य मते गुण एव रीतीनां भेदनिरूपकः उत्कर्षापकर्षाधायकत्वात्– 'तासां पूर्वं ग्राह्या गुणसाकल्यात्, न पुनरितरे स्तोकगुणत्वात्'[6] इति। तत्पूर्ववर्तिषु आलङ्कारिकेषु आचार्येण भरतेन देशगतनाट्यव्यवहारस्य भेदान् आश्रित्य प्रवृत्तिशब्दं च व्यवहृत्य रीतेः चतुर्विधत्वमुररीकृतम्– पाञ्चाली, आवन्ती, दाक्षिणात्या,

उड्रमागधी चेति।[7] भामहाचार्येण मार्गशब्दस्य प्रयोगं कृत्वा वैदर्भगौडीयभेदेन रीतेः द्वैविध्यमुल्लिखितम्। तत्र वैदर्भमार्गस्य प्रशस्यतरत्वं तदा प्रचलितमासीदित्यपि तेनाभिहितम्।[8] रीतेरयं भेदस्तु तन्मते न सङ्गतः।[9] आचार्यदण्डिना मार्गशब्दं व्यवहृत्य तस्य विचेचनं कृतम्। तस्य मते बहुप्रकारा मार्गाः सन्ति। भेदभूयस्त्वात् तयोर्विवेचनं युक्तमिति।[10] रुद्रटाचार्येण भौगोलिकं बन्धनं विहाय समासमेवाधारीकृत्य रीतिशब्दः चोल्लिख्य रीतेर्विवेचनं कृतम्। तेन रीतेः त्रैविध्यं समर्थितम्– पाञ्चाली, लाटीया, गौडीया चेति।[11] आनन्दवर्धनेन स्पष्टतया रीतेः स्वरूपं नालोचितमपि तदुक्तः संघटनाशब्दः वामनसम्मतायाः पदरचनायाः पर्याय एव। तत्स्वरूपमपि तेनैकं निरूपितम् –

'असमासा समासेन मध्यमेन च भुषिताः।
तथा दीर्घसमासेति त्रिधा संघटनोदिता।।'[12]इति

राजशेखरस्य मते वचनविन्यासक्रमः रीतिः। तथा चोक्तं तेन– 'वचनविन्यासक्रम एव रीतिः'[13] इति। राजशेखरस्य मते रीतयः तिस्रो वर्तन्ते। ताश्च वैदर्भी, गौडी, पाञ्चाली।[14] भोजेनापि वचनविन्यासक्रमस्य रीतित्वमङ्गीकृतम्। यथोक्तं तेन– 'रीतिवचनविन्यासक्रमः'[15] इति। कुन्तकेन कविस्वभावमेवाधारीकृत्य मार्गशब्दं चोल्लिख्य रीतिविवेचनं विहितम्— 'मार्गा कविप्रस्थानहेतवः'[16] इति। तस्य मते मार्गस्त्रिविधः– सुकुमारः, विचित्रः, मध्यमश्चेति।[17] कविस्वभावभेदनिबन्धनत्वेन काव्यप्रस्थानभेदः युक्तियुक्ततां गाहते– इति तन्मतम्। तथाहि– शक्ति-शक्तिमतोरभात् सुकुमारस्वभावस्य कवेः तथाविधैव सहजा शक्तिः समुद्भवति। तया च सुकुमारशक्त्या तथाविधसौकुमार्यरमणीयतां व्युत्पत्तिम् आबध्नाति। ताभ्यां च शक्ति-व्युत्पत्तिभ्यां सुकुमारमार्गानुसरणेन कवयः काव्यानुशीलने तत्परा भवन्ति। एवं विचित्रस्वभावविशिष्टाः कवयः विचित्रमार्गमनुसरन्ति, उभयमार्गस्य संमिश्रणेन काव्यरचनायां चतुराः कवयो मध्यममार्गमनुसरणन्तीत्येवं रूपेण मार्गाणां कविप्रस्थानहेतुत्वं समर्थितं कुन्तकाचार्येण।

मम्मटाचार्येण वृत्तेः रीतित्वमङ्गीकृतम्। वृत्तेश्च वर्णगतत्वात् रसविषयकव्यापारवत्त्वाच्च रीतिरपि वर्णगतो वर्णविन्यासगतो रसविषयकव्यापारवान् चेति तस्याभिमतम्। तथा चोक्तं तेन– 'वृत्तिर्नियतवर्णगतो रसविषयव्यापारः'[18] इति। तेन वृत्तेः त्रैविध्यं समर्थितं– उपनागरिका, परुषा, कोमला चेति। तन्मते उपनागरिका वृत्तिरेव वैदर्भीरीतिः, परुषावृत्तिरेव गौडीरीतिः, कोमलावृत्तिश्च पाञ्चालीरीतिः।[19] विश्वनाथस्य मते रसाद्युपकारकः पदविन्यासो रीतिः। सा चतुर्विधा– वैदर्भी, गौडी, पाञ्चाली, लाटिका चेति।[20] तस्य मते शरीरे यथास्थाने करचरणाद्यवयवसन्निवेश एव शब्दार्थशरीरे काव्ये यथास्थाने पदानां संयोजना रीतिः। सा च शब्दार्थशरीरस्य काव्यस्य आत्मभूततां रस-रसभास-भावादीनां परस्परया परिपोषिका। यथोक्तं तेन–

'पदसंघटनारीतिरङ्गसंस्थानविशेषवत्। उपकर्त्री रसादीनाम्......'[21] इति।

**घ) शिशुपालवधस्य प्रथमे सर्गे रीतिप्रयोगविमर्शः**

*शिशुपालवध*महाकाव्यस्य प्रथमसर्गे वैदर्भी, गौडी, पाञ्चाली चेति रीतित्रयस्य प्रयोगबाहुल्यं अस्माकं नयनयोरापतति। तत्रादौ वैदर्भीरीतेः स्वरूपमधिकृत्य आलङ्कारिकाणाम् अभिमतम् उपस्थाप्य माघकृतौ तस्याः प्रयोगः पर्यालोच्यते।

**वैदर्भीरीतिप्रयोगविमर्शः—**

गुणानाश्रित्य रीतिभेदं स्वीकुर्वतः दण्ड्याचार्यस्य मते श्लेषादयः दश गुणा यस्य मार्गस्य प्राणाः स वैदर्भमार्गः– 'वैदर्भमार्गस्य प्राणा दश गुणाः स्मृताः'[22] इति।

वामानाचार्येण गुणान् आश्रित्य रीतिभेदः समर्थितः। तस्य मते ओजःप्रभृतिभिः सर्वैः गुणैः उपेताः या रीतिः सा वैदर्भी— 'समस्तगुणोपेता वैदर्भी'[23] इति।

समासमाश्रित्य रीतिभेदं स्वीकुर्वतो रुद्रटाचार्यस्य मते समासरहिता रचना वैदर्भीति। तदुक्तं तेन – 'वृत्तेरसमासायाः वैदर्भी रीतिरेकैव'[24] इति।

गुणानाश्रित्य रीतिभेदं स्वीकुर्वतो मम्मटाचार्यस्य मते माधुर्यव्यञ्जकवर्णसमावेशेन वैदर्भी रीतिर्भवतीति – 'माधुर्यव्यञ्जकैर्वर्णैरुपनागरिकोच्यते'[25] इति। तत्र वृत्तौ उपनागरिकैव वैदर्भीति तेनोक्तम्।

समासमाश्रित्य रीतिभेदं स्वीकुर्वतः राजशेखरस्य मते समासरहितपदविन्यासेन भवति वैदर्भीरीतिरिति – 'स्थानानुप्रासवदसमासं योगवृत्तिगर्भं च जगाद सा वैदर्भी रीतिः'[26] इति।

समासं गुणं चोभयमाश्रित्य रीतिभेदं स्वीकुर्वता भोजेनोक्तम्– 'तत्रासमासा निःशेषश्लेषादिगुणगुम्फिता। विपञ्चीस्वरसौभाग्या वैदर्भीरीतिरिष्यते'[27] इति।

समासं गुणं चाश्रित्य रीतिभेदं स्वीकुर्वतो विश्वनाथस्य मते माधुर्यनामकगुणस्य व्यञ्जकैः वर्णैः ललितात्मिका सर्वथा समासरहिता अल्पसमासविशिष्टा वा रचना वैदर्भीरीतिनाम्ना व्यपदिश्यते। तथा चोक्तं तेन– 'माधुर्यव्यञ्जकैर्वर्णैः रचना ललितात्मिका। अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते'[28] इति। प्रसङ्गेनात्र माधुर्यगुणव्यञ्जकानां वर्णानां परिगणनं क्रियते।

वर्णानाम् अन्त्यवर्णेन अर्थात् ङ-ञ-ण-नमरूपशेषाक्षरेण मिलिताः ट-ठ-ड-ढान् विना अपरे काकारादयो मकारान्ता वर्णाः, तथा लघुप्रयत्नेन उच्चार्यौ वर्णान्तरेण असंयुक्तौ र-कार-ण-कारौ च माधुर्यव्यञ्जका भवन्ति। तथा सर्वथा समासरहिता अथवा अल्पसमासविशिष्टा मधुरा रचनापि माधुर्यव्यञ्जका भवन्तीति। तथा चोक्तं विश्वनाथेन–

'मूर्ध्नि विर्गान्त्यवर्णेन युक्ताष्ट-ठ-ड-ढान् विना।
रणौ लघू च तद्व्यक्तौ वर्णाः कारणतां गताः।
अवृत्तिरल्पवृत्तिर्वा मधुरा रचना तथा।।'[29] इति।

*शिशुपालवध*महाकाव्यस्य प्रथमे सर्गे वैदर्भी रीत्या विरचिता बहवः श्लोकाः सन्ति। तत्र दिङ्मात्रमुदाह्रियते –

'तमर्घ्यमर्घ्यादिकयादिपूरुषः सपर्यया साधु स पर्यपूपुजत्।
गृहानुपैतुं प्रणयादभीप्सवो भवन्ति नापुण्यकृतां मनीषिणः।।'[30] इति।

अत्रानुप्रासालङ्कारव्यवहारेण रचनेयं ललितात्मिका। माधुर्यगुणव्यञ्जकस्य असंयुक्तस्य ण-कारस्य, 'न्त' इति संयुक्तस्य च प्रयोगात् तथा समासरहितत्वात् अत्र वैदर्भी रीतिः।

अपरं च –

'स काञ्चने यत्र मुनेरनुज्ञया नवाम्बुदश्यामवपुर्न्यविक्षत।
जिगाय जम्बुजनितश्रियः श्रियं सुमेरुश्रृङ्गस्य तदा तदासनम्।।'[31] इति।

अत्र यमकानुप्रासयोः प्रयोगात् ललितेयं रचना। माधुर्यव्यञ्जकानां 'ञ्च', 'म्ब' 'ङ्ग' चेति वर्णसङ्घानां प्रयोगात्, असंयुक्तस्यापि माधुर्यगुणव्यञ्जकस्य र-कारस्य प्रयोगात् तथा स्वल्पसमासविशिष्टत्वात् वैदर्भी नामात्र रीतिः।

अपि च –

'स तप्तकार्तस्वरभास्वराम्बरः कठोरताराधिपलाञ्छनच्छविः।

विदिद्युते वाडवजातवेदसः शिखाभिराश्लिष्ट इवाम्भसां निधिः।।'[32] इति।

अत्रानुप्रासालङ्कारप्रयोगेन रचनेयं ललिता। अल्पसमासविशिष्टपदप्रयोगात् 'म्ब', 'ञ्छ', 'म्भ' इत्यादिमाधुर्यगुणव्यञ्जकवर्णानां प्रयोगाच्च वैदर्भी रीतिः।

एवं *शिशुपालवध*महाकाव्यस्य प्रथमसर्गे अनेकपद्येषु वैदर्भीरीतेः प्रयोगो लक्ष्यते।[33]

**गौडीरीतिप्रयोगविमर्शः—**

आचार्यदण्डिनो मते यस्य मार्गस्य श्लेषादिगुणानां विपर्ययो लक्ष्यते स गौडीयमार्गः– 'एषां विपर्ययः प्रायो दृश्यते गौडवर्त्मनि'[34] इति।

वामनाचार्यस्य मते ओजः कान्तिश्चेति गुणद्वयं यत्र वर्तते सा गौडीया रीतिः– 'ओजः कान्तिमती गौडीया'[35] इति।

रुद्रटाचार्यस्य मते बहुलसमासविशिष्टा रचना गौडी– 'शब्दाः समासवन्तो भवति यथाशक्ति गौडीया'[36] इति।

मम्मटाचार्यस्य मते ओजोगुणप्रकाशकवर्णसमवायेन या परुषा वृत्तिर्भवति सैव गौडी रीतिः– 'ओजःप्रकाशकैस्तैस्तु परुषा'[37] इति।

दीर्घसमासबद्धपदविन्यासेन भवति गौडी रीतिः इति राजशेखरस्याभिमतम्। तथा चोक्ते तेन– 'समासवदनुप्रासवद्योगवृत्तिपरम्परागर्भं जगाद सा गौडीया रीतिः'[38] इति।

समासबहुला औजः कान्तिश्चेति गुणद्वयेन विशिष्टा रीतिः गौडीति भोजराजस्याशयः। अतश्चोक्तं तेन—

'समस्तात्युद्भटपदामोजः कान्तिगुणान्विताम्।
गौडीयेति विजानन्ति रीतिं रीतिविचक्षणाः।।'[39] इति।

ओजोगुणव्यञ्जकैर्वर्णैः आडम्बरपूर्णा रचना गौडीरीतिनाम्नाभिधीयते। तथा ओजःप्रकाशकवर्णाभावेऽपि केवलबहुलसमासविशिष्टा रचनापि गौडी नाम रीतिरिति विश्वनाथपादस्याभिप्रायः। तथा चोक्तं तेन–

'ओजःप्रकाशकैर्वर्णैर्बन्ध आडम्बरः पुनः।
समासबहुला गौडी................।।'[40] इति।

प्रसङ्गेनात्र ओजोव्यञ्जकानां वर्णानां परिगणनं समुचितमेव भवेदिति विभाव्य तदेवालोच्यते। यस्य कस्यचित् सजातीयस्य विजातीयस्य वा वर्गस्य आद्यतृतीयाभ्यां वर्णाभ्यां संयुक्तौ तदान्तिमौ द्वितीय-चतुर्थौ वर्णौ ओजोव्यञ्जकतां गतौ। तथा च एकस्यैव वर्गस्य भिन्नस्य वर्गस्य वा प्रथमवर्णेन संयुक्तो द्वितीयो वर्णः, अथवा तृतीयवर्णेन संयुक्तश्चतुर्थो वर्ण ओजोव्यञ्जको भवति। तथा उपरि सरेफो वर्णः, अधः सरेफो वर्णः, द्वयोर्युगपदेव उपर्यधश्च सरेफोवर्णो वा ओजोव्यञ्जको भवति। एवं ट-ड-ढाः संयुक्ता असंयुक्ता वा ओजोगुणव्यञ्जका भवन्ति। तथा वर्णान्तरेण असंयुक्तोऽपि तालव्य-शकार, मूर्धन्य-षकारश्च ओजोव्यञ्जकौ भवतः। एवमसंयुक्तवर्णादिभिरपि दीर्घसमासयुक्ता तथा दीर्घसमासयुक्तवर्णादीनामभावेऽपि विकटार्थबोधिनी रचना ओजोगुणव्यञ्जकतां गतेति विश्वनाथपादानामभिमतम्। तदुक्तं तेन *साहित्यदर्पणे*–

'वर्गस्याद्यस्तृतीयाभ्यां युक्तौ वर्णौ तदन्तिमौ।
उपर्यधो द्वयोर्वा स-रेफः ट-ठ-ड-ढैः सह।।
शकारश्च षकारश्च तस्य व्यञ्जकतां गताः।

तथा समासबहुला घटनौद्धत्यशालिनी।।'[41] इति।

*शिशुपालवधे* प्रथमे सर्गे गौडीयरीत्या विरचितानि बहुनि पद्यानि सन्ति। तत्रोदाहरणत्वेन कति पद्यानि पर्यालोच्यन्ते। पद्यं यथा –

'श्रियःपतिः श्रीमति शासितुं जगज्जगन्निवासो वसुदेवसद्मनि।

वसन्ददर्शावतरन्तमम्बराद्धिरण्यगर्भाङ्गभुवं मुनिं हरिः।।'[42] इति।

अत्र समासबाहुल्याभावेऽपि संयुक्तस्य असंयुक्तस्य ढ श-कारस्य उपरि अधश्च रेफस्य 'द्ध' इति तृतीयचतुर्थयोः संयुक्तस्य ओजःप्रकाशकवर्णस्य प्रयोगात् गौडी रीतिः।

पद्यान्तरं –

'स्त्वमेव विश्वम्भर विश्वमीशिषे।

ऋते रवेः क्षालयितुं क्षमते कः

क्षपातमस्काण्डमलीमसं नभः।।'[43] इति।

पद्येऽत्र समासबाहुल्याभावेऽपि संयुक्तासंयुक्ताभ्यां श-ष-काराभ्याम् ओजःप्रकाशकवर्णाभ्यां केवलाडम्बरबन्धसद्भावादेव गौडी रीतिः।

अन्यदुदाहरणम्–

'स सञ्चरिष्णुर्भुवनान्तरेषु यां यदृच्छयाशिश्रियदाश्रयः श्रियः।

अकारि तस्यै मुकुटोपलस्खलत्करैस्त्रिसन्ध्यं त्रिदशैर्दिशे नमः।।'[44] इति।

अत्र ओजोगुणव्यञ्जकस्य संयुक्तस्यासंयुक्तस्य ष-कारस्य असंयुक्तस्य ट-कारस्य च प्रयोगात् तथा संयुक्तस्यासंयुक्तस्य श-कारस्य प्रयोगबाहुल्यात् बहुलसमासवद्धपदप्रयोगात् केवलाडम्बरबन्धसद्भावात् गौडी रीतिः।

एवं *शिशुपालवधस्य* प्रथमे सर्गे अनेकपद्ये अस्याः रीतेः प्रयोगो लक्ष्यते।[45]

**पाञ्चालीरीतिप्रयोगविमर्शः –**

*शिशुपालवधस्य* प्रथमे सर्गे पाञ्चालीरीतिप्रयोगविवेचनावसरे तस्याः स्वरूपमधिकृत्यालङ्कारिकाणां मतमादौ पर्यालोच्यते।

माधुर्येण सौकुमार्येण च गुणेन उपपन्ना या रीतिः सा पाञ्चालीति वामनाचार्यस्य मतम्। तथा चोक्तं तेन– 'माधुर्यसौकुमार्योपपन्ना पाञ्चाली'[46] इति।

रुद्रटस्य मते अल्पसमासविशिष्टा रचना पाञ्चालीति। तथा चोक्तं तेन – 'द्वित्रिपदा पाञ्चाली'[47] इति।

प्रसादगुणव्यञ्जकवर्णसमारोहेण समुदिता या कोमला वृत्तिः सैव पाञ्चाली रीतिरिति मम्मटाचार्यस्य मतम् – 'कोमला परैः'[48] इति।

राजशेखरस्य मते स्वल्पसमासविशिष्टपदविन्यासेन भवति पाञ्चाली रीतिः। तदुक्तं तेन 'ईषदसमासमीषदनुप्रासमुपचारगर्भं च जगाद सा पाञ्चाली रीतिः'[49] इति।

मध्यमपरिमाणसमासविशिष्टा माधुर्यं सुकुमारश्चेति गुणद्वयेन विभूषिता रीतिः पाञ्चाली इति भोजराजस्याशयः।[50]

वैदर्भीगौडीरीत्योः अवशिष्टैः माधुर्यौजोगुणयोः व्यञ्जकभिन्नैः वर्णैः पञ्चभिः षडविधा समासविशिष्टपदैः कृतस्य बन्धस्य पाञ्चालीरीतिरिति नामेति विश्वनाथस्याभिमतम्। तदुक्तं तेन–

'...... वर्णैः शेषैः पुनर्द्वयोः। समस्त-पञ्चय-पदो बन्धः पाञ्चालिका मता।'[51] इति।

*शिशुपालवधस्य* प्रथमे सर्गे पाञ्चालीरीत्या विवेचितानि बहूनि पद्यानि सन्ति। तत्रोदाहरणत्वे कति उपस्थाप्यन्ते।

'चयस्त्विषामित्यवधारितं पुरा ततः शरीरीति विभाविताकृतिम्।
विभुर्विभक्तावयवं पुमानिति क्रमादमुं नारद इत्यबोधि सः।।'[52] इति।

अत्र पद्ये स्वल्पसमासयुक्तपादानां प्रयोगात् श्रुतिमात्रतः एवार्थबोधकशब्दप्रयोगेन सहसैव चित्तव्यापानात्, माधुर्यौजोगुणव्यञ्जकवर्णप्रयोगाभावात् पाञ्चलीति रीतिः।

अन्यदुदाहरणम्–

'अनन्तगुर्वास्तव केन केवलः पुराणमूर्तेर्महिमावगम्यते।
मनुष्यजन्मापि सुरासुरान् गुणैर्भवान् भवच्छेदकरैः करोत्यधः।।'[53] इति।

अत्रत्या वर्णा न माधुर्यव्यञ्जका न वा ओजोगुणव्यञ्जकाः। मध्यमपरिमाणसमासप्रयोगात् श्रुतिमात्रत एवार्थबोधकशब्दप्रयोगेन सहसैव चित्तव्यपनात् पाञ्चाली रीतिः।

अपि च,

'अशक्नुवन् सोढुमधीरलोचनः सहस्ररश्मेरिव यस्य दर्शनम्।
प्रविश्य हेमाद्रिगुहागृहान्तरं निनाय बिभ्यद्दिवसानि कौशिकः।।'[54] इति।

अत्र पद्ये अल्पपरिमाणसमासप्रयोगेन श्रुतिमात्रतः एवार्थावगमात् प्रसादगुणसद्भावात् माधुर्यौजोगुणव्यञ्जकवर्णानां प्रयोगात् पाञ्चाली रीतिः।

एवं *शिशुपालवध*महाकाव्ये प्रथमे सर्गे बहुत्र पद्येषु इयं पाञ्चाली रीतिरालोक्यते।[55]

**ङ) उपसंहृतिः—**

सम्प्रति समवसितमस्माकं नातिविस्तृतं समीक्षणम्। समीक्षणस्यास्य फलरूपेण कति विषया अस्माकं मननपदवीम् अवतरन्ति येषां समुल्लेखः कर्तव्यतया प्रतिभाति। माघकवेः कविवासना सुविस्तृता बहुपदार्थाभिव्यापिनी च। तथाहि तत्रभवान् माघः प्रयोजनानुसारतः स्वकीयभावाभिव्यक्तेरनुकूलाविधया रीतीनां यथेच्छं प्रयोगं विदधाति। वैदर्भीरीतिमनुसृत्य यानि पद्यानि तेन विरचितानि तेषु वक्तृ-बोध्यव्य-प्रकरणौचित्येन समुपादीयमानस्य गुणस्य समासस्य च प्रयोगो परिलक्ष्यते। अतश्च तेन क्वचिन् माधुर्यं नाम गुणो यथा समनुसृतः तथा क्वचित् प्रसादो नाम गुणः। एवं क्वचित् तेन समासरहितं पदं यथा व्यवहृतं तथा स्वल्पसमासयुक्तं पदमपि। रचनाया लालित्यसमानयने तेन विरचितानि तेषु अपि प्रयोजनानुसारतः समासबहुलपदानां व्यवहारो यथा तेन कृतः, तथा स्वल्पसमासवशिष्टपदानामपि। एवं क्वचित् ओजोगुणव्यञ्जकवर्णानां प्रयोगबाहुल्यात् आडम्बरबन्धस्य सद्भावः परिलक्ष्यते। पाञ्चालीरीत्या विरचितेषु पद्येषु क्वचित् तेन यथा प्रसादगुणस्य आश्रयो नीतः तथा क्वचित् क्वचित् माधुर्यगुणस्य ओजोगुणस्य च। एवं प्रयोजनानुसारेण क्वचित् मध्यमपरिमाणसमासबद्धपदानां प्रयोगो यथा दरीदृश्यते, तथा क्वचित् क्वचित् अल्परिमाणसमासबद्धपदानामपि। लाटीरीतेः निदर्शनं प्रथमसर्गेणोपलब्धमित्यतः तद्विषयकं पर्यालोचनं न कृतमस्माभिः।

## Endnotes

1. *साहित्यदर्पणः*, ९/१, कुसुमप्रतिमाटीका
2. *काव्यालङ्कारसूत्रवृत्तिः*, कामधेनुटीका।
3. 'रीतिरात्मा काव्यस्य' – *काव्यालङ्कारसूत्रवृत्तिः*, १/२/३
4. *काव्यालङ्कारसूत्रवृत्तिः*, १/२/७-८
5. तत्रैव, १/२/१०
6. तत्रैव, १/२/१४-१५
7. *नाट्यशास्त्रम्*, १४/३६
8. *काव्यालङ्कारः*, १/३१
9. तत्रैव, १/३२
10. *काव्यादर्शः*, १/४०
11. 'रीतयस्तिस्रः' – *काव्यालङ्कारः*, २/३
12. *ध्वन्यालोकः*, ३/५
13. *काव्यमीमांसा*, १/३
14. तत्रैव, ७, पृ., ३१
15. *शृङ्गारप्रकाशः*, पृ., १९३
16. *वक्रोक्तिजीवितम्*, १/२४
17. तदेव।
18. *काव्यप्रकाशः*, ९/१०५ वृत्त्यंशः।
19. तत्रैव, ९/८१, वृत्त्यंशः।
20. 'वैदर्भी चाथ गौडी च पाञ्चाली लाटिका तथा।' – *साहित्यदर्पणः*, ९/२
21. *साहित्यदर्पणः*, ९/१
22. *काव्यादर्शः*, १/४२
23. *काव्यालङ्कारसूत्रवृत्तिः*, १/२/११
24. *काव्यालङ्कारः*, २/६
25. *काव्यप्रकाशः*, ९/८१
26. *काव्यमीमांसा*, तृतीयोऽध्यायः, पृ.,९
27. *सरस्वतीकण्ठाभरणम्*, २/५३
28. *साहित्यदर्पणः*, ९/३
29. तत्रैव, ८/५
30. *शिशुपालवधम्*, १/१४
31. *शिशुपालवधम्*, १/१९
32. तत्रैव, १/२०
33. १/२३ , ३०, ३१, ५० चेत्यादयः श्लोकाः।
34. *काव्यादर्शः*, १/४२
35. *काव्यालङ्कारसूत्रवृत्तिः*, १/२/१२
36. *काव्यालङ्कारः*, २/५
37. *काव्यप्रकाशः*, ९/८१
38. *काव्यमीमांसा*, तृतीयोऽध्यायः, पृ., ९
39. *सरस्वतीकण्ठाभरणम्*, २/५५
40. *साहित्यदर्पणः*, ९/४
41. *साहित्यदर्पणः*, ८/७
42. *शिशुपालवधम्*, १/१
43. *शिशुपालवधम्*, १/३८
44. *शिशुपालवधम्*, १/४६
45. १/३९, ४३, ६८, ७१, ७२, ७३, ७४
46. *काव्यालङ्कारसूत्रवृत्तिः*, १/२/१३
47. *काव्यालङ्कारः*, २/५
48. *काव्यप्रकाशः*, ९/८२ वृत्त्यंशः।
49. *काव्यमीमांसा*, तृतीयोऽध्यायः, पृ., ९
50. *सरस्वतीकण्ठाभरणम्*, २/५४
51. *साहित्यदर्पणः*, ९/५
52. *शिशुपालवधम्*, १/३
53. *शिशुपालवधम्*, १/३५
54. *शिशुपालवधम्*, १/५३
55. १/९, ११, १२, १३, २८, ३२, ३३, ३४, ३६, ४५ प्रभृतिषु पद्येषु।

## Bibliography


- आनन्दवर्धनः. *ध्वन्यालोकः*. सम्पादकः आचार्यजगन्नाथपाठकः. वाराणसी: चौखम्बाविद्याभवन, १९६४ (प्रथमसंस्करणम्)
- कुन्तकः. *वक्रोक्तिजीवितम्*. सम्पादकः राधेश्यामिश्रः. वाराणसी: चौखम्बासंस्कृतसंस्थान, १९८३
- जगन्नाथः. *रसगङ्गाधरः*. मुम्बाइ: काव्यमालासंख्या – १२, १९१३

- दण्डी. *काव्यादर्शः*. सम्पादिका चिन्मयीचट्टोपाध्यायः. कलकाता: पश्चिमवङ्ग-राज्यपुस्तक-पर्षत्, १९९५
- भरतः. *नाट्यशास्त्रम्*. सम्पादकः एम. रामकृष्णकविः. बरोदा: ओरियेन्टाल इनस्टिटिउट्, १९५४
- भामहः. *काव्यालंकारः* (आनन्दाख्य-हिन्दीभाष्यसंवलितः). अनुवादकः रामानन्दशर्मा, वाराणसी: चौखम्बासंस्कृतसीरीजअफिस, २०१३ (द्वितीयसंस्करणम्)
- भोजः. *शृङ्गारप्रकाशः*. सम्पादकः वि.राघवन्. माद्राजः १९६३
- ____. *सरस्वतीकण्ठाभरणम्*. मुम्बइ: काव्यमाला-संख्या – ९५, १९२५
- मम्मटः. *काव्यप्रकाशः*. सम्पादकः श्रीहरिशङ्करशर्मा. वाराणसी: चौखम्बासंस्कृतसीरीजअफिस, १९६७ (तृतीयं संस्करणम्)
- माघः. *शिशुपालवधम्* (प्रथमः सर्गः). सम्पादकः ड.सत्यनारायणचक्रवर्ती. कलकाता: संस्कृतपुस्तकभाण्डारः, २०१३ (षष्ठसंस्करणम्)
- राजशेखरः. *काव्यमीमांसा.* सम्पादकः सि.डि.दालाल-आर.ए.शास्त्रिमहाभागाभ्याम्. बरोदा: ओरियेन्टाल इनस्टिटिउट्, १९३४
- रुद्रट. *काव्यालङ्कारः*. श्रीनमिसाधुप्रणीतया टीकया समुपेतः. दिल्ली: मोतीलाल बनारसी दास, १९८३
- वामनः. *काव्यालङ्कारसूत्रवृत्तिः*. सम्पादकः ड. बेचनझा. वाराणसी: चौखम्बासंस्कृतसंस्थान, १९७३
- विद्याधरः. *एकावली* (तरलाटीकोपेता). सम्पादकः के.पी.त्रिवेदी. मुम्बइ: १९०३
- विश्वनाथकविराजः. *साहित्यदर्पणः*. सम्पादकः हरिदाससिद्धान्तवागीशभट्टाचार्यः. कलकाता: संस्कृत-बुक्-डिपो, १९८१
- शारदातनयः. *भावप्रकाशः*. सम्पादकः यदुगिरिवतिराजस्वामि-के.एस.रामस्वामिशास्त्रि-शिरोमणिभ्याम्. बरोदा: ओरियेन्टाल इनस्टिटिउट्, १९३०


---